শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

ৱিল্লূর্ নডাদূর্ শ্রী শ্রীনিধিস্বামি ৱিরচিতঃ

# ॥শ্রীমালোলস্তৱঃ ॥

*This document[*] has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

[*] This was typeset using Bengali for TEX.

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

# ॥ শ্রীমালোলস্তৱঃ ॥

কৰিতাজিতকল্লোলিকন্যকাকান্তৰক্ষসে।
করুণাদিগুণাঢ্যায কমলানিধযে নমঃ॥

মাযা ধৰ! শ্রীনৃহরে নমস্তে!
কাযাধৱার্থং কলিতাৱতার!।
মাযাপরং মামপি রক্ষিতুং ত্বং
কাযান্তরাভাহি তমো ৱিভিন্দন্॥ ১ ॥

মালোলমাহুর্ভগৱন! ভৱন্তং
সন্তো মহান্তো নিগমান্তনিষ্ঠাঃ।
তথৈকলং চাহুরহো! ৱিচিত্রং
মিথো ৱিরোধান্মতিরেতি মোহম্॥ ২ ॥

ত্বাং তত্ত্বতো ৱেত্তুমহং ন চালং
মামেকলং তেন ৱিভাৱযামি।
মালোললোলং চ ৱিভাৱ্য নাথ!
দযানিধে! মোহমহং ত্যজামি॥ ৩ ॥

হিরণ্যৱর্ণাং হরিণীং ৱহন্তং
গজং ভজন্তং পরিপালযন্তম্।
মালোলসিংহং পরমাদ্ভুতং ত্বাং
আগস্বিনামগ্রগতঃ প্রপদ্যে॥ ৪ ॥

হিরণ্যমূর্তিং তপনান্তরঙ্গে
হিরণ্যশৃঙ্গং ৱরুণাত্মতাযাম্।
হিরণ্যৱর্ণাং হরিণীং ৱহন্তং
হিরণ্যদানং ভগৱন্তমীডে॥ ৫ ॥

প্রহ্লাদৱন্নতজনং পরিপালযন্তং
তত্তাতৱন্নতজনাঘমপোহযন্তম্।

www.prapatti.com

প্রহ্লাদদং নতজনায হিরণ্যদং চ
মালোলমানৱমৃগেন্দ্রমহং প্রপদ্যে॥ ৬ ॥

স্থূণাধিকানামপি মাদৃশানাম
অন্তর্নিৱাসায স এৱ যোগ্যাম্।
স্থূণান্তরাসাদ্য চকার তস্মৈ
মালোলসিংহায নমো নমোস্তু॥ ৭ ॥

হিরণ্যৱক্ষো ন রুষা ৱ্যদারীত
দযানিধির্ৱতসল এষ নাথঃ।
নখৈশ্চিকিতসাং পুনরাততান
দোষান্ তদন্তৰ্ৱহতো নিরস্যন্॥ ৮ ॥

এৱং ত্রিরেৱ প্রভুরস্য কৃত্বা
ৱৈদ্যশ্চিকিতসাং শিশুপালতাযাম্।
দোষানপোহ্য ক্ষমযা দদৌ তত
স্বানন্দমস্মৈ তমমুং প্রপদ্যে॥ ৯ ॥

মালোলসিংহায নমো নমস্তে
মালোলমেনং ৱিষযেষ্ৱজস্রম্।
আলোলমাহেতি কুটুম্বকার্যে
মালোলমালোকত আতনুষৱ॥ ১০ ॥

মালোলেতি ত্র্যক্ষরী যস্য কণ্ঠে
মালোলা স্যাত্ সুস্থিরা তস্য গেহে।
মালা লোলা সতকলানাং চ তস্মিন
বালালাপা লালনীযাঃ কলাশ্চ॥ ১১ ॥

শ্রীৱাসরাঘৱকৱীন্দ্রপযোধিজাতং
মালোলৱিষ্ণুপদদেৱনদর্শনীযম্।
এতং নিষেৱ্য সমযে স্তৱরাজচন্দ্রং
সংসারতাপমখিলং শমযন্তু সন্তঃ॥ ১২ ॥

॥ ইতি শ্ৰীমালোলস্তৱঃ সমাপ্তঃ ॥

www.prapatti.com